# "अभिधान-राजेन्द्र-कोशस्तथा जैन-कोश-विद्या"

(डॉ. रुद्रदेव त्रिपाठी)

**अहो माहात्म्यं कोशस्य !**

**कोशश्चैव महीपानां कोशश्च विदुषामपि ।**
**उपयोगेन महानेष क्लेशस्तेन विना भवेत् ॥**

अभियुक्तोक्तिरियं सर्वथा सत्या सती सर्वदा सतां श्रुतिकुहरेषु किमपि कमनीयं जीवनरसं पूरयन्तीव कोशमाहात्म्यं स्फोरयति । न तद् राष्ट्रं शासनं वा राज्यकार्यं सुचारु-रूपेण चालयितुं, शक्नोति, यस्य सविधे कोशो न स्यात्, न च ते विद्वांसोऽपि स्वानि कविकर्माणि यथेच्छं सम्पादयितुं शक्नुवन्ति येषां समीपे शब्दकोशो न भवेत् । यतो हि शासनसूत्रसञ्चालने भूयसीर्जनसुखकारिणीर्योजनाः फलवतीर्विधातुं प्रवृत्तौ सत्यामपि कोशं विना कथं ताः सफलाः सम्भवेयुः ? शब्ददारिद्र्याक्रान्ताश्च विपश्चितः कवयो यथारुचि शब्दानामन्वेषणे प्रसक्ता उत्तमोत्तमानां भावानां विभावने च कथं समर्था भवेयुरिति सत्यमेव माहात्म्यं कोशस्य ।

कोशोत्पत्ति-विचारणा सृष्टावस्त्यानन्त्यं वस्तूनाम् । तानि वस्तूनि पृथक्-पृथक् परिचेतुं परिचाययितुं च तेषामभिधानान्यपि पृथक्-पृथक् दर्शितानि विद्यन्त एव । सृष्टेः प्रवाहानुरूपमेव शब्दप्रवाहोऽपि निरन्तरं निरर्गलं प्रवहन् न जाने कुतः कुत्र सम्प्राप्तः ? कालक्रमेण शब्दानामर्था अपि विस्मृतिं यान्तीति हेतोस्तेषामर्थावबोधाय -

**शक्तिग्रहं व्याकरणोपमान-कोशाप्तवाक्याद् व्यवहारतश्च ।**
**वाक्यस्य शेषाद् विवृतेर्वदन्ति, सांनिध्यतः सिद्धपदस्य वृद्धाः ॥**

इति सङ्केतग्रहस्याष्टौ साधनानि सूचयद्भिराचार्यैः कोशस्यावश्यकत्वं सुतरां प्रतिपादितम् ।

'आवश्यकतैवाविष्काराणां जननी'ति सिद्धान्तोक्त्यनुसारं मन्येऽनुकम्पापरवशैराचार्यैर्लोकानां हित शब्दानां तदर्थानुसन्धानपूर्वकं सङ्कलनं विधाय कोशः कोशरूपेणोपस्थापितः । प्राचीनायाः प्राचीनया गवेषणया गवेषकैः सर्वप्रथमः कोशो महर्षेः कश्यपस्य (ईसातोऽप्यष्टशतवर्षप्राक्तनस्य 'निघण्टु' रस्तीति सुनिश्चितम् ।'

वैदिकानां शब्दानामर्थनिर्वचनमेवास्य लक्ष्यम् । अस्मात् पूर्वमपि के चन कोशकारा अभूवन् परं तेषां ग्रन्था नोपलभ्यन्ते । निघण्टोरस्यापि ज्ञातारो यदा दुर्लभा अभवँस्तदा महर्षिणा यास्केन तज्ज्ञानाय 'निरुक्त'स्य निर्माणं कृतम् । वस्तुत इदं निरुक्तं तस्य निघण्टोष्टीकैवास्ति । निरुक्तेऽस्मिन् प्राचीनानाम्-औपमन्यव-प्रभृतीनां निरुक्तकाराणां नामान्यपि सूचितानि सन्ति यानि कोशनिर्मितेः पूर्वतनीं प्रवृत्तिं पुरस्कुर्वन्ति । एवं भारते कोश-निर्माण-कलायाः प्रारम्भः कश्यपस्य महर्षेर्निघण्टु-कोशादेव मन्यते ।

**कोश-विद्या-विकासः**

'यथायथोपयुनक्ति तथा तथा परिष्कृतिर्भवति' तथ्यमिदं कोश-विद्याया विकासेऽपि निदर्शनायते । निघण्टौ कस्यापि वैदिकस्य ग्रन्थस्य सङ्ग्रहः केवलं क्लिष्टानां शब्दानामेव सङ्ग्रहः तत्रापि नामाव्ययाख्यातशब्दानां सङ्ग्रह एवासीत् । वैदिकशब्दानामर्थ-सूचनमेवासीत् तदीयं लक्ष्यम् । ततः परं निरुक्तकारेण निर्वचनद्वाराऽर्थस्पष्टीकाराय प्रयतितम् तत्र हि -

**"वर्णागमो वर्णविपर्ययश्च, द्वौ चापरौ वर्ण-विकार-नाशौ ।**
**धातोस्तदर्थातिशयेन योगस्तदुच्यते पञ्चविधं निरुक्तम् ॥**

इत्यासीद् रचना-प्रक्रिया । एवं भाषाविज्ञानदृशा दुरुहशब्दानां व्याख्या अपि निरुक्त एव प्रकटिता । सहैव निरुक्ते प्रत्येकं शब्दस्य 'प्रचलितार्थो विशिष्टार्थो विशिष्टार्थ - नियन्त्रणकारणानि चापि यास्काचार्यैर्व्याख्यातानि । एतां विवेचन-प्रणालीं विलोक्यैव कतिपये विद्वांसो निरुक्तं व्याकरणशास्त्रान्तर्गतामेव मन्वते । अद्यापि भाषाविज्ञानविदोऽस्य निरुक्तस्य बहुशो नियमान् वैज्ञानिकान् मानयित्वा स्वीकुर्वन्ति । इयं वैदिकी कोश-विद्या ततोऽग्रे तादृशं प्रसारं न प्राप्तवती ।

गद्य-पद्यात्मकं लौकिक-संस्कृत-साहित्यमधिकृत्य पुरोवर्तिन आचार्याः 'कवीनां (रचनाधर्मिणां शास्त्रज्ञानैकधिषणानां) हितकाम्यया' नैकेषां शब्दानां मालारूपेण सङ्ग्रहं विधाय 'लौकिक-संस्कृत-शब्द-कोश' - ग्रन्थानां परम्परामाविरकार्षुः । अस्यां परम्परायां प्राधान्येन त्रयः प्रकाराः प्रवृत्ताः । ते हि - १, एकार्थनाममालारूपाः, २ - अनेकार्थकनाम - मालारूपास्तथा ३ एकाक्षर-नाममालारूपाः सन्ति । एतेषां रचनाविधानमपि गद्यात्मिकां निरुक्तपद्धतिं विसृज्य मुख्यरूपेण पद्यरूपात्मकमेव स्वीकृतम् । तत्रापि विशिष्यानुष्टुप्छन्दस एव प्रयोग आदृतः । ईदृशानां कोशानां निर्माणोद्देश्येषु -

१. महत्त्वपूर्णानां विरलप्रयुक्तानां कविजनोपयोगिशब्दानां सङ्ग्रहः ।

२. संयम-विचाराचार-नियमापन्न-पानाशन-वसन-सहनादीनां शास्त्रबहिर्भूत-त्वाद् बल-वीर्य-मेधा-विद्या-तपश्चरणादीनां ह्रासाद् लौकिक-शब्दानामप्यर्थज्ञानस्य दुर्बोधत्वात् तद्वारणाय शास्त्रज्ञानार्थं च शब्दसङ्ग्रहः ।

३. काव्यनिर्माणार्थं पर्यायवाचिशब्दानां सङ्कलनञ्चेति - प्रधानान्युद्देश्यान्यासन् । तेषु मुख्यत्वेन नामपदानामव्ययानाञ्चैव सङ्ग्रहो 'भवति स्म । इयमासीत् प्रारम्भिकी कोश-विद्या प्रवेशिका-पद्धतिः ।



---

' निघण्टु-शब्दार्थाः किल - (१) अर्थस्य द्योतकः (२) वेदेभ्यः सङ्गृहीतस्तथा (३) एकशः कथित इति सन्ति ।



झगडा, झंझट त्याग दे, और झुठ भी छोड ।
जयन्तसेन सौख्य मिले, प्रपंच से मुख मोड ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**प्राचीनं कोश-साहित्यम्**

संस्कृत-साहित्ये सम्प्राप्तेषूद्धरणेषु यत्र तत्र निर्दिष्टानामनेकेषां कोशग्रन्थानां नामान्युपलभ्यन्ते, येषु भागुरिकृतः 'त्रिकाण्डकोशः', वाचस्पति - रचितः 'शब्दार्णवः', विक्रमादित्य-विरचितः 'संसारावर्तः' वररुचेः 'नाममाला', व्याडेः 'उत्पलिनीकोशः', आपिशलेः शाकटायनस्य चाज्ञातनामानौ कौचित् कोशौ स्पृहणीयतां भजन्ति स्म । कतिपयेऽन्येऽपि कोशा अद्यत्वे नामशेषा एव विद्यन्ते । परमुपलभ्यमानेषु लौकिक-संस्कृत-कोशेषु प्राचीनात् प्राचीनः श्रीमतोऽमरसिंहस्य 'नामलिङ्गानुशासनं - (अमरकोशापराख्यं) विद्यते । अयं कोशः पर्यायकोशोऽनेकाक्षरकोशश्चेति निगद्यते । अस्य कालो मैक्समूलर-स्याभिमतानुसारं षष्ठशत्याः पूर्वतनः । डॉ. हार्नले महोदयस्य मते ६२५-६४० ई. वत्सरात्मको मन्यते । साम्प्रतं प्रसिद्धेषु कोशेषूपयोगितादृष्ट्याऽस्यैव कोशस्य सर्वत्र प्रचारो वर्तते । अस्य वैशिष्ट्यमस्मादपि सिद्धं भवति यदस्य प्रायः पञ्चाशन्मिताष्टीका विविधाचार्य-विरचिता विराजन्ते । अस्य रचना-पद्धतिः सुसंयता सुसङ्गता वैज्ञानिकी चास्ति । बालानां सुखबोधाय प्रारम्भकाले कण्ठस्थकरणायानुष्टुप्छन्दसा प्रत्येकं नाम्नो यावच्छक्यं विविधाः पर्यायाः प्रदत्ताः ।

**कोश-निर्माण-परम्परा**

इतः परं कोश-निर्माण-विधौ नैरन्तर्यमायातं तत्फलरूपेण च शाश्वतस्य 'अनेकार्थ-समुच्चयः', हर्षवर्धनस्य (सप्तमशत्यां) लिङ्गानुशासनं', पुरुषोत्तमदेवस्य ''त्रिकाण्डशेष-हारावली-वर्णमाला-एकाक्षरकोश-द्विरूपकोशाः', वामनस्य 'लिङ्गानुशासनं' चेत्यादयोऽप्यस्यामेव शत्यां निर्मिताः । दशैकादशशत्योश्च हलायुधस्य 'अभिधान-रत्नमाला', विशिष्टाद्वैतवादिनो यादवप्रकाशस्य ''वैजयन्ती'' भोजराजस्य च 'नाममालिका' ख्यातिं प्राप्ताः । इयमेव नानारूपेण प्रवर्तमाना परम्पराऽद्य यावद् नैकान् कोशान् पुरस्कुर्वाणा विलोक्यन्ते ।



संस्कृत तथा हिन्दी दोनों भाषाओं पर विद्वत्तापूर्ण समान अधिकार । अच्छे लेखक तथा विचारक । शोध में विशेष रुचि । जैन संस्कृति के विषयों का खोजपूर्ण अध्ययन । कई ग्रन्थों तथा पत्रपत्रिकाओं में लेखों का प्रकाशन । पचांग-संशोधन आदि कार्य में अनवरत साधनाशील । बम्बई, दिल्ली जैसे केन्द्रों पर रह कर साहित्य सृजन ।

वर्तमानमें विक्रम विश्वविद्यालय उज्जैन के अंतर्गत विक्रम कीर्ति मंदिर के अन्वेषण विभाग में कार्यरत । मंदसौर (म.प्र.) में आपका जन्म तथा प्रारंभिक शिक्षा दीक्षा । धर्म के प्रति आस्था. मंत्रों की सिद्धि में आनुष्ठानिक क्रियाशीलता ।

**डॉ. रुद्रदेव त्रिपाठी,**
**आचार्य;**
**एम.ए., पी.एच.डी.,**
**डी.लिट्**

एतेषु कोशेषु केचन लिङ्गानुसारिणः केचन च विषयानुसारिणः सन्ति । परेषु केषुचित् कोशेषु शब्दानां चयनं प्रथमवर्णानुसार-मन्त्यवर्णानुसारं वा विहितमस्ति । एकाक्षर-कोश-रचनायां स्वर-व्यञ्जन-संयुक्तरूपेषु त्रिषु वर्गेषु विभागः कृतः । श्लोक-निर्माणविधौ प्रथमं पूर्णे श्लोके निवेशयोग्याः पर्यायास्ततोऽर्ध श्लोके समावेश्याः पर्यायाः प्रान्तेच श्लोकस्य प्रतिचरणं निवेशनार्हाः पर्यायाः समाकलिता विद्यन्ते। अमरकोशे नानार्थवर्गस्यान्तर्गतमनेकार्थकानां शब्दानां सङ्ग्रहणमपि वर्तते; अतः स मिश्रप्रकारोऽपि वक्तुं शक्यते ।

**कोश-निर्माण-पद्धति-परिचयः**

उपर्युक्तायां परम्परायां निर्माण-पद्धतेर्ये प्रकाराः स्वीकृताः सन्ति तेषां संक्षिप्तः परिचयोऽत्र क्रमेण प्रस्तूयते । यथा -

**१. लिङ्गानुसारी शब्दावचयः**

शब्द-प्रयोगावसरे तेषां लिङ्गज्ञानमत्यावश्यकं भवति । विशेषणरूपेण प्रयोगसमये सकलमपि वाक्यकदम्बं विशेष्यमनुकरोति । तदर्थं नियमदर्शिकियमार्या सुप्रसिद्धाऽस्ति -

**यल्लिङ्गं यद्वचनं या च विभक्तिर्विशेष्यस्य ।**
**तल्लिङ्गं तद्वचनं सैव विभक्तिर्विशेषणस्यापि ॥**

अतएव कोशकाराः लिङ्गानुशासनं मुख्यत्वेनाङ्गीकृत्य कोशान् व्यरचयन् । तेषु सर्वतः प्रथममरकोशकारेण तृतीये काण्डे पद्धतिरेषा स्वीकृता ।[१] ततः परं हर्षवर्धन-वामन-केशवस्वामिभिः स्वे स्वे कोषग्रन्थे पुँल्लिङ्ग-स्त्रीलिङ्ग-नपुंसकलिङ्गानेकलिङ्गात्मकशब्दानां क्रमशश्चयनं विहितम् । 'सुजान' कृतायां 'शब्द-लिङ्गार्थचन्द्रिका'यां तु क्रमेण एकलिङ्ग-द्विलिङ्ग-त्रिलिङ्गरूपेण त्रयः - काण्डा एव निर्मिताः 'यादव-प्रकाश'स्य 'वैजयन्ती'' कोशे पुंस्त्रीनपुंसकलिङ्गैः सहैव 'अभिधेयवल्लिङ्ग नानालिङ्ग'- नामभ्यामपि वर्गीकरणं प्रस्तुतम् । साम्प्रतिकेन श्रीमुकुन्दशर्मणा लिङ्गानुशासनवर्गापराख्ये 'मुकुन्दकोशे' लिङ्गत्रय्या सह पुंस्त्रीलिङ्ग - पुंनपुंसकलिङ्ग - स्त्रीनपुंसक-त्रिलिङ्गाभिधेयवल्लिङ्ग-नामभिः केचनान्येऽपि वर्गा आपादिताः ।

**२-विषयानुसारि-शब्दावचयः**

'शब्दानां सागरादपेक्षितानि रत्नानि सम्यक् सञ्चय्य कवयो रचना विदधति परं यदि सागरेऽन्वेषणाय तेषां भूयान् कालो व्यत्यापेत तदा तु कल्पना-कुरङ्गी न जाने कुत्र विद्रुता विहृता वा भवेदिति कष्टमाकलय्य कोशनिर्मातृभिर्विषयानुसारि शब्दसङ्कलनमादृतम् ।[३] तस्यां

[१] अत्र प्रस्तावनारूपेण लिङ्ग-निर्णयाय निर्देशोऽयं विद्यते–
प्रायशो रूपभेदेन साहचर्याच्च कुत्र चित् ।
स्त्री-पुं-नपुंसकं ज्ञेयं तद्विशेष-विधेः क्वचित् ॥
भेदाख्यानाय न द्वन्द्वो नैकशेषो न सङ्करः ।
कृतोऽत्र भिन्नलिङ्गानामनुक्तानां क्रमाद् ऋते ॥३-४॥इत्यादि॥

[२] काव्य-शिक्षा-काव्यकल्पलता - कविशिक्षादिष्वप्येतादृशाः शब्दाः सङ्कुलिता दृश्यन्ते ।

[३] यथा - अमरा निर्जरा देवास्त्रिदशा विबुधाः सुराः ।
सुपर्वाणः सुमनसस्त्रिदिवेशा दिवौकसः ॥ इत्यादि ॥





श्रद्धा ज्ञान सदाचरण, रक्खो नित समभाव ।
जयन्तसेन दुर्गुण से, करते नित्य बचाव ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

दिश्यपि प्राथम्यं श्रीमतोऽमरसिंहस्यैव विलोक्यते । तेन हि स्वीये कोशे त्रिषु काण्डेषु 'स्वर्ग-व्योम-दिक्काल-धीशब्दादि-नाट्य-पाताल-भोगि-नरक-वारि-भूमिपुर-शैल-वनौषधि-सिंहादि-मनुष्य-ब्रह्म-क्षत्रिय-वैश्य-शूद्रप्रभृतयो विभिन्ना वर्गा आविष्कृताः । एषैव पद्धतिरग्रिमैः कोश-प्रणेतृभिरपि स्वीकृता ।

**३-प्रथमवर्णानुसारि-शब्दावचयः**

यदा कदा काव्यादिरचनायां काठिन्यमिदमप्युपतिष्ठते यत् पद्यादि-योजनायां कश्चन विशिष्टवर्णात्मकः शब्द एव नितान्तमावश्यकोभवति । सन्धि-नियमानां बाधातो मुक्तयेऽपीदृशाः शब्दा अभीप्स्यन्ते । मन्येऽत एव यादवप्रकाशस्य वैजयन्त्याम्, अजयपालस्य नानार्थरत्नमालायां-श्रीहेमचन्द्राचार्यस्य नाममाला (रयणमाला)यां मेदिनीकोशादिषु च कादयः खादयः शब्दाः प्रथमवर्णानुसारि-शब्दावचयरूपेण समायोजिताः ।

**४-अन्त्यवर्णानुसारि-शब्दावचयः**

काव्येष्वलङ्काराङ्कन-दृशा केचन निश्चित-वर्णात्मकाः शब्दाः शब्दालङ्कार-परिपुष्टये नितान्तमुपादेया भवन्ति । अनुप्रास-यमक-चित्रभेदेषु पूर्वापरवर्ण-विन्यास-वैशिष्ट्येन किमपि सहृदयाह्लादि वैचित्र्यमुपस्थापयति । नाद-माधुरी-प्रमोदपूरेण सहैव रचनागतमौज्ज्वल्यं च स्वान्तमुल्लासयति । अनयैव भावनयाऽन्त्यवर्णानुसारि-शब्दावचयमङ्गीकृत्य मङ्खकविः 'अनेकार्थकोशं', महेश्वरसूरिः 'विश्वप्रकाश-कोशं', मेदिनीकोशकारः 'मेदिनीकोशं', तञ्जौरभूपः शाहजीः 'शब्दरत्नसमन्वयकोशं', विश्वनाथः 'कोशकल्पतरुं' कश्चनाज्ञातनामाऽऽचार्यो 'नानार्थपद-पेटिकां' च रचितवान् । एतेषु क्रमशः कान्ताः खान्ता गान्तप्रभृतयश्च शब्दाः सङ्गृहीताः सन्ति ।

**५-अक्षर-सङ्ख्यानुसारि-शब्दावचयः**

कियन्तो वर्णाः कुत्रापेक्षितास्ते स्फुरणा-समनन्तरमेव यदि लभ्येरन् तदा छन्दो-निबन्धने च-वा-तु-हि-वै-प्रभृतीनामव्ययानां निरर्थकपदानां स्थापना न क्रियेत । किञ्च सूत्ररूपेण समासशैल्या वाऽभीप्सितस्याख्यानं सरलं भवेदिति विचारणया केशवस्वामिनो 'नानार्थकरत्न-संक्षेपे', तञ्जौराधिपतेः श्रीशाहस्य 'शब्दरत्न-समन्वये' क्रमश एकवर्ण-द्विवर्णात्मकशब्दानां सङ्कलना विद्यते । 'कवि-कल्पलता' याममर चन्द्रयतिरपि पद्धतिमिमां स्वीकृत्य शब्दराशिं प्रास्तौदथ च तत्रैव 'कनक' सदृशान् लोम-विलोमभावेऽप्ये-करूपधरान् कतिपयानन्य-यमक-श्लेषालङ्कारोपयोजिशब्दानपि समगृह्णात् ।[१] सेयं प्रक्रियापि कोश-दृशा महनीयैव ।

**६-पर्याय-परिणामानुसारि-शब्दावचयः**

कस्य शब्दस्य कियन्तः पर्यायाः सन्तीति विभावयितुं धनञ्जयः शाश्वतोऽने-कार्थसमुच्चयं' धनपालश्च 'पाइय-लच्छी नाममालां' निर्माय तत्र प्रथमं प्रतिपाद्यावसायिनस्ततोऽर्धपद्यावसायिनः प्रान्ते प्रतिचरणावसायिनः पर्यायान् स्थापितवन्तौ ।

साम्प्रतिके वैज्ञानिके युगे तु कोश-निर्माण-कलेयं पूर्णाभिः कलाभिः परिस्फुरन्ती किमप्यभिनवं स्वरूपमेवाविष्करोति । तत्र हि

१-अनुक्रमणिका कोशेषु पदपाद-वाक्य-सिद्धान्तानां सङ्ग्रहाः क्रियन्ते ।[२] २-शब्द-विवेचनात्मककोशे लक्षणावली विशिष्ट-प्रयुक्त-सम्प्रदाय-सिद्धादिशब्दानां विवेचनानि प्रस्तूयन्ते । ३ - विषयानुसारि-सङ्ग्रह-कोशेषु विशिष्टानां विषयाणां प्रतिपादनाय कालक्रमेणो-पदिष्टानां ग्रन्थानामाधारेण विवरणानि संस्थाप्यन्ते । एवमेव 'धातुकोशाः परिभाषा कोशाः सङ्ग्रहकोशा ग्रन्थकोशा विश्वकोशादयश्चाद्य कोशनिर्माणस्य सुदीर्घां परम्परां व्यञ्जयन्तो विलसन्ति नवनवाश्च प्रयोगा आविर्भवन्ति तदनुसारं च बुद्धि-कौशल-साधन-सौविध्यबलेनोत्तरोत्तरं प्रयासा निरन्तरमाधीयन्ते ।

**कोश-विद्यायां जैनानां योग-दानम्**

विश्वस्य वाङ्मये जैनाचार्यैर्जैन-गृहस्थ-मनीषिभिश्चापूर्वं योगदानं विहितमस्ति । यस्मिन् कस्मिन्नपि विषये दृष्टिर्दीयते तत्रैव तेषां किमप्यपूर्वमेव चिन्तनं दर्शनञ्चोपलभ्यते । बहुषु विषयेषु तु परेषां सम्प्रदायानां यत्र मुष्टिमेयमेव साहित्यं मिलति तत्रैव सम्प्रदायेऽस्मिन् पर्याप्तं विशालं साहित्यं विलोक्यते । परः सहस्त्रेभ्यो वत्सरेभ्यः प्रवहन्त्याः श्रमणसंस्कृतेरुपासकास्ते संस्कृत-साहित्यस्य भाण्डागारं पूरयितुं तत्परा अनवरतं साहित्यसृष्ट्ये नैकशः प्रायतन्त । अत एव कोशविद्याक्षेत्रमपि नास्ति शून्यं दुर्बलं वेति शक्यते सुदृढं वक्तुम् । अत्र तैर्विरचितानां कोशानां परिचयाय मनाक् पर्यालोच्यते -

**जैन-कोश-साहित्य-समुद्भवः**

यथा वैदिकसम्प्रदायवन्तो वेदेभ्य एव सर्वासां विधानां समुद्भूतिं स्वीकुर्वन्ति तथैव जैनधर्मावलम्बिनोऽपि जैनागमेभ्य एव सर्वविधस्य साहित्यस्य समुद्भवं स्वीकुर्वन्ति । एतदनुसारं कोशसाहित्यस्य रचना अपि सत्प्रवादपूर्वस्य तथा विद्यानुवादस्य पञ्चशतमहाविद्यास्वक्षर-विद्यायां सम्मिलन्ति । प्रारम्भकाले - 'आगमानां भाष्याणि, चूर्णयो वृत्तयो विभिन्नाष्टीकाश्च कोशसाहित्यस्य पूर्तिं कुर्वन्ति स्म । कालान्तरे यदा भाष्याणां चूर्णीनां वृत्तिप्रभृतीनांच शब्दार्थज्ञानं क्रमशः श्लथमभूत् तदा शब्दकोशानामावश्यकता समजनि तस्माद् भाष्य-चूर्णि-वृत्ति-निर्मित्युत्तरकालिक एवास्ति 'जैन-कोश-साहित्यस्य समुद्भव-काल' इति निश्चप्रचम् । कालोऽयं ख्रीस्तीय नवमशत्याः स्वीक्रियते, यदा हि सर्वप्रथममागमानामालेखनमारब्धमभूत् । मन्ये तेष्वेव वर्षेषु कोश-सङ्ग्रहोऽपि प्रारब्धो भवेत् !

**आद्यौ जैन-कोशकारौ**

**१. श्रीधनञ्जयः** - अन्येषां शास्त्राणामिव कोश-साहित्येऽपि जैनविद्वांसो निरन्तरं लिखन्त एवावर्तन्त । परं स्वतन्त्ररूपेणोपलभ्यमानेषु कोशेषु नवम-शत्यां समुत्पन्नस्य द्विसन्धान-महाकाव्यस्य 'राघव-पाण्डवीय'स्य रचयितुः श्रीधनञ्जयस्य 'नाममाला-अनेकार्थ-नाममाला-अनेकार्थनिघण्टु-एकाक्षरी-कोशा' उपलभ्यन्ते । अयं हि जैनगृहस्थः 'सुदृष्टतरङ्गिण्या' आधारेण (४१ तमङ्गेण) ज्ञायते यदमरकोश कारस्यामरसिंहस्य श्यालक आसीदिति ।

१ - स्वसाहित्यशास्त्रीयां जैनानां ग्रन्थरूप-सेवामभिलक्ष्यानेन लेखकेन 'श्रीमद्यशोविजयोपाध्यायविरचित 'काव्यप्रकाश-टीका' ग्रन्थस्य भूमिकायां विशिष्य विवेचितमस्ति । तच्चद्रष्टव्यं-



---

१ बाण-मयूर-मुरारि-श्रीहर्ष-प्रभृतिभिः कविभिरपि कोशा निर्मिता आसन् । श्रीहर्षेण 'श्लेषार्थ-पद-सङ्ग्रह' नाम्ना कोशो विरचित आसीद् यस्मिन् श्लिष्ट शब्दानां सङ्ग्रहोऽभूत् । द्रष्टव्यः-'इ. डी. कुलकर्णी-महोदयस्य लेखः "वाक्"।।

२ वेदानामागमानां शास्त्राणां पुराणानां चेदृशाः कोशाः सम्प्रत्युपलभ्यन्तो ।



कलही क्लेशी कैतवी, कुविचारी कुधि क्रूर ।
जयन्तसेन सुखद नहीं, रहना इन से दूर ।।

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्री यशोभारतीप्रकाशन समिति-बम्बईतः प्रकाशिते ''काव्य-प्रकाशे'' । स्वीयस्य द्विसन्धानकाव्यस्यान्तिमे पद्ये स्वयं परिचाययन्नयं स्वां मातरं 'श्रीदेवी' — नाम्ना स्वं जनकञ्च वसुदेवाख्यया गुरुं च दशरथाभिधानेन बोधयति । अस्य महाकवेः शब्दशास्त्रे पूर्णोऽधिकार आसीत् । शब्दार्थज्ञानेन सह तस्य समुचित-प्रयोग-वैदग्ध्यप्रशंसा चेत्थं वर्णितैतेन-

**ब्रह्माणं समुपेक्ष्य वेदनिनदव्याजात् तुषाराचल -**

**स्थानस्थावरमीश्वरं सुरनदीव्याजात् तथा केशवम् ।**

**अप्यम्भोनिधिशायिनं जलनिधिर्ध्वानोपदेशादहो,**

**फूत्कुर्वन्ति धनञ्जयस्य च भिया शब्दाः समुत्पीडिताः ॥**

**'नाममाला' परिचय :**

इयं द्विशतश्लोकेषु संस्कृतभाषाया आवश्यकानां सप्तदशशतशब्दानामर्थान् प्रस्तौति । अत्रैकां विशिष्टां प्रणालीं निर्माय महाकविर्धनञ्जय एकस्माच्छब्दाच्छब्दान्तर-निर्माणकलामपि प्रकाशयति । इयं कला पर्यायवाचिनां शब्दानां परिज्ञानं तु कारयत्येव तया कलयाऽन्यविधानां पर्यायवाचिशब्दानां बोधोऽपि सुखेन सम्पद्यते । यथा-पृथ्वीवाचिशब्दैः सह 'धर' - पदस्य योजनया पर्वतवाचिशब्दानां, 'पति' शब्दयोजनेन राजवाचिनां, 'रुह' पद योजनेन च वृक्षवाचिनां शब्दानां निर्माणं चमत्करोति । इयं वैज्ञानिका शैली सर्वप्रथममने नैवाविष्कृताऽस्ति । नाममालाया भाष्यमपि ततोऽधिकं माहात्म्यं प्रकटयति तच्च पञ्चदश्याः शत्या अमरकीर्तिना निर्मितम् । यत्र सूत्रनिर्देशः, इतरे पर्यायाः, व्युत्पत्तयः पर्याय शब्दानां सङ्ख्या अपि विस्मयावहाः सन्ति ।

अस्यैव महाकवेः 'अनेकार्थ-नाममाला' - 'अनेकार्थ-निघण्टु'स्तथा 'एकाक्षर-कोशोऽपि संस्मरणीय एव ।

**२-श्रीधनपालः**

जैन-सम्प्रदाये भगवतामुपदेशा अर्धमागध्यामेव सन्ति । तत्कारणं च श्रीहरिभद्रसूरिणा - 'बालस्त्रीमन्दमूर्खाणां नृणां चारित्रकांक्षिणाम् । अनुग्रहार्थं सर्वज्ञैः सिद्धान्तः प्राकृते कृतः' इति स्पष्टीकृतम् । अत एव धनपालः 'पाइय-लच्छी-नाममालां' व्यरीरचत् । अस्यां २७५ गाथाः सन्ति यासु संस्कृत-व्युत्पत्ति-सिद्धाः प्राकृतशब्दास्तथा देश्यशब्दाः सङ्कलिता विद्यन्ते । प्रान्ते प्रत्ययानामर्था अपि प्रत्ताः । एवं प्राकृतकोशकर्तृषु धनपालस्याद्यकोशकर्तृत्वेन सुबहु सम्मानोऽस्ति ।

**कलिकालसर्वज्ञः श्रीहेमचन्द्राचार्यः**

कालक्रमानुसारं जैनकोशकारेषु धनञ्जय-धनपालयोरनन्तरं श्री हेमचन्द्राचार्यस्याभिधानं संस्मरणीयं विद्यते । साहित्यस्य प्रत्येक शाखायां - 'व्याकरण-कोशच्छन्दोऽलङ्कार-काव्य-न्याय-तत्त्वज्ञान-योग'- प्रभृतिविषयानधिकृत्य प्रौढ-ग्रन्थानां निर्मातृत्वेन सुप्रद्धिः श्रीमानयमाचार्यो गूर्जरप्रदेशस्य 'धुन्धुका' - नाम्नि ग्रामे वि. सं. ११४५ तमे वत्सरे समुत्पन्नः श्रीदेवसूरेर्दीक्षामवाप्य हेमचन्द्राभिधया विख्यातोऽभूत् । कालान्तरेण स्वस्यागाधवैदुष्यवशादाचार्यत्वं प्राप्तः 'कलिकालसर्वज्ञ' इति सम्मानपदेन सभाजित आसीत् ।

श्रीहेमचन्द्राचार्यः कोशसाहित्ये चतुरः कोशान् निरमात् । ते च १ - अभिधान-चिन्तामणि - २ - अनेकार्थसङ्ग्रह - ३ - निघण्टुशेष - ४ - देशीनाममालाश्चेति सन्ति । एतेष्वाद्यास्त्रयः कोशाः संस्कृतशब्दानामन्त्यश्च देश्यशब्दानां सङ्ग्रहात्मका वर्तन्ते । अनेकार्थ-सङ्ग्रहे सप्तसु काण्डेषु क्रमश एक-द्वि-त्रि-स्वर-क्रमेण षट्काण्डाः प्रान्तेऽव्ययशब्दरूपः सप्तमः काण्ड एवं १०२९ पद्यानां सङ्ग्रहोऽस्ति। निघण्टौ षट्सु काण्डेषु वृक्ष-गुल्म-लता-तृण-शाक-धान्यानां शब्दाः ३९६ पद्यैः प्रकाशिताः । देशीनाममालायां ३९७८ संख्यकशब्दानां सङ्कलनं शोभते । वर्णक्रमेण रचितायामस्यां ७८२ गाथाः सन्ति यत्रोदाहरणाय काश्चनान्या गाथा अपि सङ्गृहीताः । तत्सम-तद्भव-संशययुक्ततद्भवव्युत्पादित - प्राकृत शब्दा अत्र महतीमावश्यकतां पूरयन्ति । एवं हेमचन्द्राचार्यस्येमा रचना सर्वोपयोग्यास्तु सन्त्येव ।

अतोऽपि महत्तरा कृतिः कोशविद्यायाम् - 'अभिधान-चिन्तामणिः' - 'नामशेषमाला' पूर्णं महत्त्वं बिभर्ति । अस्मिञ्चिन्तामणौ सम्पूर्णं जैनत्वं सुरक्षितं विराजते । तीर्थङ्कराणां नामानि, तेषां पर्यायशब्दाः, तेषां मातृ-पितृनामानि, अतिशयनामावली, भूत भविष्यद्-वर्तमान-कालिकचतुर्विंशी, गणधराणां नामानि, तीर्थपानां ध्वजचिह्नानि, अन्तिमकेवली, ऋतकेवली, तीर्थेशानां जन्मभूमयस्तथा, जैनाम्नायसम्मतानां देवगति-तिर्यग्गत्योर्जीवानां वर्णनानि चात्र विशिष्टानि विद्यन्ते । पृथ्व्यप्तेजोवायुवनस्पतिकायिकजीवानां द्वि-त्रि-चतुः- पञ्चेन्द्रिय जीवानां नामानि सर्वप्रथममेवास्मिन् कोशे समग्रतया परिचायितानि । कोशरचनाया अनेके विधयोऽत्र प्राथम्येनाविष्कृता इति महत्त्वमस्याक्षुण्णमेव ।

**अन्ये जैनकोशकाराः**

श्रीहेमचन्द्राचार्याणां परम्परामनुसरन्तः केचनाचार्या उत्तरकालेऽपि तथाविधान् कोशान् विरचितवन्तः किञ्चतैस्तस्मिन् विषये स्वीयं विशिष्टं प्रावीण्यमपि प्रकटितम् । यथा -

**आचार्यः श्रीजिनभद्रसूरिः**

त्रयोदश्यां शत्यां वर्तमानेनानेन सूरिवरेण 'अपवर्गनाममाला' नाम्नैकस्यांशिकशब्दकोशस्य रचना विहिता यत्रांशरूपेण केचन शब्दाः सङ्गृहीताः ।

**आचार्यः श्रीपद्मनन्दिः**

त्रयोदश्याः शत्या एवान्तिमे चरणे (१२३०-१३३०ई.) जैनाचार्येणानेन 'निघण्टु' नाम्ना वैद्यविद्याया एकः कोशो विरचितः ।

**महाक्षपणकः**

'अनेकार्थ-ध्वनि-मञ्जरी' नाम्ना विरचितोऽस्य कोशः 'शब्दरत्नप्रदीप' नाम्नाऽपि प्रसिद्धः । २२० पद्यैरञ्चितोऽयं त्रिभागेषु विभक्तः । अस्य कालस्तु न निश्चितः ।

**अमरकवीन्द्रः**

जैनकविरमरकवीन्द्रोऽमरपण्डितापरनामधेय 'एकाक्षर-नाममालां' व्यरचयत् । अस्यां १९ श्लोका एव सन्ति । गूर्जरत्रा-प्रदेशस्य वीसलदेवनृपस्य संरक्षणेऽयमभूत् ।





गुण गायक गुणी जन पुनि, गुण दृष्टा इन्सान ।
जयन्तसेन मनुज यही, पावे पद निर्वाण ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

**अन्ये जैनाःकोशकर्तारः**

चतुर्दश्यां शत्यां सेनसङ्घस्याचार्येण श्रीधरसेनेन 'विश्वलोचनकोशः' (मुक्तावाली-कोषावर नामकः), राजशेखरसूरि-शिष्येण सुधाकलशाचार्येण 'एकाक्षर-नाममाला', सम्राजोऽकबरस्य शासनकालिकेन जैनविदुषा पद्मसुन्दरेण 'सुन्दरप्रकाश-कोशः' (पदार्थ चिन्तामणिः शब्दार्णवो'वा), तत्सम्राट् सम्मानितेन श्रीभानुविजय-गणिना 'विविक्त-नामसङ्ग्रहः' (नाममालासङ्ग्रहोवा) रचितः । षोडश्यां शत्यां श्रीहर्षकीर्तिसूरिः 'शारदीय (मनोरमा) नाममालां' विमलसूरिश्च 'देश्यशब्दसमुच्चयं' प्राणैषीत् । सप्तदश्यां शत्यां खरतगच्छस्यैकेनाज्ञातनामकेन सूरिणा 'शेषनाममाला', साधुकीर्तेः शिष्येण सुन्दगणिना 'शब्दरत्नाकरः' सहजकीर्तिगणिना च 'सिद्धशब्दार्णवो' रचितः । एवमेव 'प्रबन्धकोशः' श्री राजशेखरसूरेः, 'वस्तुरत्नकोश-एकादिसङ्ख्यासंज्ञाकोशौ' चाज्ञातकर्तृकस्य प्रख्यातौस्तः । जैनकथासाहित्यमाश्रित्यापि - 'बृहत्कथाकोशः' श्रीहरिषेणस्य गद्य कोशः- (आराधनाकोशः- प्रभाचन्द्राचार्यस्य, 'आख्यानमणिकोशः' नेमिचन्द्रसूरेः, 'कथारत्नकोशो' ब्रह्मदेवाचार्यस्य, 'कथाकोशः श्रुतदेवस्य, ''जातक-कथा-कोश-बृहत्कथाकोशौ'च नवमशतीतो द्वादशशतीं यावत् प्रणीताः ।

**श्रीमन्तो विजयराजेन्द्रसूरीश्वराः**

उपरि निर्दिष्टानां कोश-ग्रन्थानां महनीय-मालायां सुमेरु-स्थानीयो विशालाकारः श्रीमद्विजयराजेन्द्रसूरीश्वरमहाभागैः प्रणीतः 'अभिधान-राजेन्द्रकोशः' किमपि विशिष्टं स्थानं कोशविद्यायां बिभर्ति । अस्य कोशस्य निर्मातारः किल महातपस्विनः शास्त्रनिष्ठा-निषेवितान्तकरणाः स्वधर्मपालनतत्पराश्चासन् । एतेषां जन्म १८२७ ई. तमे वर्षे राजस्थानस्य 'भरतपुर' नगरे पारखगोत्रीयौशवालवैश्यान्ववाये श्रेष्ठिवर्य श्रीऋषभदासमहाभागस्य धर्मपत्न्याः 'श्रीकेसरीबाई' महाभागाया रत्नकुक्षितोऽभवत् । जन्म नाम च तदा 'रत्नराज' इत्यासीत् । सर्वैः सौम्यगुणैर्मण्डितस्य श्रीरत्नराजस्य - प्राथमिकी शिक्षा स्वगृहे तथा स्वग्रामस्याध्ययनशालायामेव सञ्जाता ।

प्रायेण द्वादशे वर्षे रत्नराजोऽयं पितुराज्ञां प्राप्य श्रीकेसरियाजीमहातीर्थस्य यात्रामकरोत्, तदैव मार्गे श्रेष्ठिनः श्रीसौभाग्यमल्लस्य पुत्र्याः डाकिनीदोषं स्वसाधनाबलेन न्यवारयत् । तदानीं श्रीरत्नराजस्य प्रभावातिशयेन चमत्कृतः स श्रेष्ठी स्वपुत्र्या रमादेव्या सह तस्य विवाहायापि व्यचारयत् परं भावी तु कश्चनान्य एवाभूत् । कालान्तरेण श्रीरत्नराजः स्वकीयज्येष्ठसहोदरेण सह कालिकात्ता-महानगर्यां प्रस्थितः । तत्र व्यापारमाचरन्तौ तौ प्रसङ्गवशात् सिंहलदेशमपि गतवन्तौ तत्र च व्यापारचातुर्येण द्रव्याणि सङ्गृह्य पुनः कालिकात्तानगर्यां परावृत्तौ । वृद्धौ च मातापितरौ भरतपुरे तदा रुग्णावभूतामतः स्वनगरं समागत्य तयोः सेवायां संलग्नौ । दैववशात् तौ दिवं प्रयातौ । पित्रोः स्वर्गमनेन प्राप्तप्रबोध इव श्रीरत्नराजः संसारस्य नश्वरत्वं परमेश्वरस्य पारमेष्ठ्यं तथा वैराग्यमेवाभयमिति साक्षादनुभवन् परिवार-पञ्जरं भित्त्वा भागवतीं दीक्षां प्राप्तुं गृहात् प्रस्थितः । १९०३ वै. वत्सरे वैशाखशुक्लपञ्चम्यां शुक्रवासरे श्रीप्रमोदविजयमहाराजानां निर्देशात् तेषां ज्येष्ठगुरुभ्रातुः श्रीहेमविजयमहाराजादार्हतीं यतिदीक्षां गृहीत्वा 'श्रीरत्नविजय' नाम्ना प्रख्यापितः । अनया दीक्षया मुनिमण्डले नवदीक्षितः श्रीरत्नराजो धन्यधन्यो जातः ।

ततः श्रीगुरूणां प्रमोदविजयमहाराजानामेव सम्मत्या 'मूकसरस्वती' - विरुदधरेभ्यः श्रीसागरचन्द्रमहाराजेभ्यो व्याकरण - साहित्यादि - शास्त्राणां तथा तपागच्छाधिपतिभ्यो जैन-सिद्धान्तानां क्रमशोऽध्ययनं विधाय श्रमणसङ्घे भूयसीं प्रतिष्ठां क्रमशो लब्धवान् । यथाकालं पन्यास-पदव्या विभूषितः स्वगुरुप्रदत्ता विद्याः सम्प्राप्य च प्रौढत्वं प्राप्तः पूज्यो लोकमाननीयश्चाप्यभवत् । तदैव सूरि-पदेनाप्यलङ्कृतः । 'श्रीमद्-विजयराजेन्द्रसूरि' रिति महनीयेनाभिधानेन विख्यातोऽयं महात्मा ढुण्ढकमतानुयायिनः शास्त्रार्थान् विधाय स्वीयाः साधना-प्रक्रियाः संसाध्य दैवं बलं सम्प्राप्य प्रायो २५० जीवेभ्यो भागवतीं दीक्षां प्रदाय विपुलां साहित्य-निर्मितिञ्चाकरोत् ।

**अभिधान-राजेन्द्रकोशः**

लोके भणितिरियं प्रसिद्धाऽस्ति यत् ''कोशवानेव कोशंसंगृहीतुं जनेभ्यो वितरितुं च समर्थो भवति ।'' तदनुसारं श्रीमन्तो विजयराजेन्द्रसूरयोऽपि भूयसा ज्ञानधनेन सम्पन्ना आसन्नत एव तैः सार्धचतुर्लक्षश्लोक-प्रमाणोऽभिधानराजेन्द्रकोशं निर्मितवन्तः । षष्टि-सहस्र-संख्यकाः प्राकृत भाषाशब्दा अपि कोशेऽस्मिन् संगृहीताः । इत्थमयं कोशराजः संस्कृत - प्राकृतभाषयोरितः पूर्वं सङ्गृहीतेभ्यः कोशेभ्यः परमं प्रावीण्यं प्राचीकटत् । यद्यपि महत्तामीदृशाणां कोशानां निर्माणविधौ कश्चन समवायः सम्भूय कार्यं करोति परमभिधानराजेन्द्रकोशकारैः श्रीसूरिभिः स्वकीययैवैकया प्रतिभयाऽहर्निशं परिश्रम्य कोशोऽयं विरचितः । सप्तसु भागेषु सुसम्पाद्य 'सियाणा' नगरे सं. १९४६ तमे वर्षे आषाढ-शुक्ल द्वितीयायां प्रारब्धस्य तथा 'सूरत' नगरे सं. १९६० मिते वर्षे चैत्रशुक्लत्रयोदश्यां परिपूर्णस्यास्य कोशराजस्य सार्धचतुर्दशवर्षाणामहोरात्राविश्रान्तश्रमस्य महत्परिणतिरूपेण प्रकाशनं सप्तदशवर्षाणां सततश्रमेण पूर्णतां प्राप्तम् । प्रकाशनस्य श्रेयः किलोपाध्याय श्रीमोहनविजयश्रीदीपविजय-श्रीयतीन्द्रविजय-सूरिवरेभ्यस्तेषामेव परम्परायां विद्यमानेभ्यो गुरुवरेभ्यो गच्छति यैः परमया निष्ठया भक्त्या प्रतिभया च महत्तमं कार्यमिदं सम्पादितम् ।

अत्र हि या पुष्पिका दर्शिताऽस्ति तत्र कोशविषये स्पष्टीकृतं विद्यते यत् - ''श्रीसर्वज्ञप्ररूपित - गणधरनिर्वर्तिताद्यश्वीनोपलभ्य-मानाशेष-सूत्र-तद्वृत्ति-भाष्य-निर्युक्ति-चूर्ण्यादि-विहितसकल-दार्शनिक-सिद्धान्तेतिहास-शिल्प-वेदान्त-न्याय-वैशेषिक-मीमांसादि-प्रदर्शित-पदार्थ-युक्तायुक्तत्व-निर्णायकः ''कोशोऽयमिति ।

इत्थमिह क्रमशः १ - मूलशब्दः प्राकृतभाषामयोऽकारादि क्रमेण, २ - संस्कृतानुवादः, ३ - व्युत्पत्तिः, ४ - लिङ्गनिर्देशः, ५ - अर्थः, ६ - जैनागमसम्मतोऽर्थः, ७ - सति सम्भवे भिन्न-भिन्ना अर्थाः, ७ - महत्सु पदेषु तेषां प्रयोगदर्शकाधिकारादिनिरूपणं, ८ - मूलसूत्रपाठः, ९ - टीकाकर्तृभिर्विहिताः स्पष्टता, १० - ग्रन्थान्तर-प्राप्तोविषय - विस्तारः, ११ - एकस्यैव शब्दस्य विभिन्नाः सम्भाव्याः संस्कृत-शब्दाः, १२ - प्राकृत - व्याकृति - प्राकृत - शब्दरूपावली - परिशिष्टादिशब्दशास्त्रीय - विमर्श सहिताः कस्य न सचेतसो मानसं रञ्जयति बोधयति च ?

अस्य पूर्वे सम्पादयितारोऽपि जैनागमानां तत्सिद्धान्तानां व्याकरणादि-





Jain Education International For Private & Personal Use Only www.jainelibrary.org

- विविध - शास्त्राणां च पूर्णतया परिज्ञातार आसन्, तस्मादेवातिप्रवीणया धियाऽस्य सम्पादनमकुर्वन् ।

वस्तुतः साहित्यस्य धरातलं लोकादूर्ध्वं भवति, तदुपरि विशालस्य संसारस्य स्रष्टेव विद्वान् विराजते । स हि जनः स्वीये मनसि विचिन्त्य परीक्ष्य च यां वाचं प्रस्तौति तस्या मर्म तत्समभावनाशालिन एव ज्ञातुं प्रभवन्ति । "विद्वानेव विजानाति विद्वज्जन - परिश्रमम् ।

**नहि वन्ध्या विजानाति गुर्वी प्रसववेदनाम् ॥**

इत्ययमाभाणकः किल - अभिधान - राजेन्द्रकोशस्य नितरां परिशीलनेनैव विपश्चितः कथञ्चित् सकलागमपारदृश्वानां श्रीमतां विजयराजेन्द्रसूरीश्वराणां श्रमजातं वैदुष्यं च परिज्ञातुं प्रभवन्तीति सत्यमेव ।

अत एव समस्तानां जैनागमानां तदङ्गभूतानामन्येषां टीका - प्रटीकादिग्रन्थानां सारसर्वस्वं सरलया पद्धत्या समालोड्य समुद्राद् रत्नभूतानां शब्दरत्नानां वास्तविकं तत्त्वं परिबोधयितुं श्रीमद्विजयराजेन्द्रसूरिवरैर्विनिर्मितोऽभिधानराजेन्द्रकोशः प्रामाणिकं साहित्यं प्रस्तौति । कोशेऽस्मिन् कोश-विद्यायै समपेक्षिताः प्रक्रियास्तु प्रयुक्ता एव, सहैव नवनवाः प्रकारा अप्याविष्कृताः । जैन-सिद्धान्तपरिज्ञानाय कोशोऽयं कल्पवृक्षायितः । ग्रन्थानां मूलपाठ-सङ्ग्रहेणास्य महत्त्वं सर्वोपरि परिगण्यते । विद्याविदां समाजे स्वदेशे विदेशे वा सर्वत्र यादृशः सम्मानः श्रीमदभिधान राजेन्द्र - कोशेन समवाप्तः स तु सर्वानतिशेत एव ।

**पुनः प्रकाशन - भगीरथाः श्रीमद् - जयन्तसेनसूरयो "मधुकराः"**

चिरकालात् प्रकाशितस्याभिधानराजेन्द्रकोशस्य भागा विद्वद्भ्यो दुर्लभसञ्जाता आसन् । साम्प्रतिके युगे शोधशालानां महाग्रन्थागाराणां तथा विश्वविद्यालयानां विस्तारः समुहान् संवृत्तः । अनुसन्धातॄणां कृते जैनागम-वर्णित-विषयावबोधाय कोशराजस्यास्य महत्त्वावश्यकताऽनुभूयते स्म । तामनुभूय श्रीमन्त आचार्य-प्रवरा श्रीजयन्तसेनसूरयस्तेषु सूरिवरेषु श्रद्धधाना भगीरथेन प्रयासेन समग्रस्य तस्य प्रकाशनेन समस्तं विद्वज्जगदुपकृतवन्त इति महते गौरवाय । तेभ्यो विनता अभिनन्दनाञ्जलयः साम्प्रतं ग्रन्थ-विशेषरूपेण समर्पयितुकामाः सन्ति भक्तिभाजो विद्यानुरागिण इति महत् प्रमोदस्थानम् । 'चिरं जीवन्तुतमाम्' ते महाभागा इति परमेश्वरं वयमपि सर्वात्मना प्रार्थयामः । इति शम् ।

**राष्ट्रस्यास्य विराजते सुमहती स्पष्टा प्रतिष्ठा क्षितौ,**
**ज्ञानेनैव चिरात् प्रखरिणी सर्वोच्च-सानौ स्थिता ।**
**तामात्मप्रतिभाभरेण निरतं संवर्धयन्तो बुधाः,**
**केषां नैव भवन्तु भूमिपटले ते वन्दनाभागिनः ॥ १ ॥**

**विश्वज्ञान-निधानवर्षणपरस्तत्त्वप्रकाशान्वितः**
**शब्दार्थागम-मण्डितः श्रुतपथाचारश्रियाऽऽभासितः ।**
**जैनानामखिलार्थसार्थसहितो रत्नत्रयी-राजितः,**
**श्रीराजेन्द्रगुरोरमेययशसां कोशश्चिरं राजताम् ॥**

**मधुकर-मौक्तिक**

*हम अक्सर कहा करते हैं : 'मैं तो अपने मन के अनुसार चलता हूँ' । यह बात मन का अपने ऊपर अधिकार सिद्ध करती है । यदि हमें 'जीव' का विश्वास हो जाए, तो हम ऐसा नहीं कहेंगे । 'जीव' का विश्वास होने के बाद हमारा कहने का ढंग बदल जाएगा । तब हम कहेंगे, हमारे 'जीव' को जैसा जँचेगा, वैसा हम करेंगे । आज तक हम मन को जँचे वैसा करते आये हैं और इसीलिए इसका परिणाम यह हुआ है कि मन हम पर सवार हो गया है । वस्तुतः होना यह चाहिये था कि हम मन पर सवार हो जाते; पर हुआ उल्टा ही; मन हम पर सवार हो गया । सवार घोड़े पर बैठने के बजाय घोड़ा सवार पर बैठ गया । सवार पर घोड़ा बैठ गया तो फिर रहा ही क्या ?*

*ज्ञानी कहते हैं, 'मन के घोड़े पर हमें बैठना है और उसे लगाम बाँधना है ।' मन का घोड़ा हम पर सवारी कर चुका है, यह जानकर के उसे दूर हटाना है । उस पर सवार होने की योग्यता हमें प्राप्त करनी है । वह योग्यता और शक्ति हमें तब ही प्राप्त हो सकती है, जब हम पंच परमेष्ठियों का परिचय प्राप्त कर उनकी शरण में जाएँ । जब हम नवकार मन्त्र के सच्चे आराधक होंगे, तभी हमें पंच परमेष्ठी की शरण प्राप्त होगी । महामन्त्र का आराधक कभी इस संसार-चक्र में नहीं फँसेगा । असल में उसके सामने भव-भ्रमण का चक्र रहता ही नहीं है; किन्तु हम तो हमेशा चक्कर में ही बैठे हैं । चक्कर के सिवा हमारे पास और है ही क्या ?*

***— जैनाचार्य श्रीमद् जयंतसेनसूरि 'मधुकर'***





इस रंगीले जगत का, चित्र विचित्र स्वरूप ।
जयन्तसेन स्वभाव में, रहना सौख्य अनूप ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org